९३६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

- Title – अथ विष्णुसहस्र नाम प्रारम्भः
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 23/46
- Lines-
- Size
- Substance Paper –
- Script Devanagari ✓
- Language – संस्कृत
- Period –
- Beginning – श्री गणेशाय नमः। यस्य स्मरण मात्रेण जन्म संसार बंधनात् विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥
- End – ब्रह्म हत्यादिकं पापं सर्वं संघापि नश्यति ।
- Colophon-
- Illustrations -
- Source -
- Subject - महाभारत
- Revisor -
- Author - ज्वाला प्रशाद शर्म्मणा

1. Remarks- पूर्ण ।

Nandini
Gauri

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१६६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

2 ९३:

९६ 3

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथविष्णुसहस्त्र नाम प्रारम्भः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

...यनमः ॥ यस्यस्मरणमात्रेणजन्मसंसारबंधनात्
विमुच्यतेनमस्तस्मैविष्णवेप्रभविष्णवे ॥१॥ नमःसमस्तभूता
नामादिभूतायभूभृते ॥ अनेकरूपरूपायविष्णवेप्रभविष्णवे
...नउवाच ॥ श्रुत्वाधर्मानशेषेणपावनानिचसर्वशः
युधिष्ठिरःशांतनवंपुनरेवाभ्यभाषत ॥२॥ युधिष्ठिर उ...
किमेकंदैवतंलोकेकिंवाप्येकंपरायणं । स्तुवन्तःकंकमर्चन्तः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१ प्राप्नुयुर्मानवाः शुभम् ॥ ४ कोधर्मः सर्वधर्माणांभवतः परमोमतः
किंजपन्मुच्यतेजन्तुर्जन्मसंसारबन्धनात् ॥ ५ ॥ भीष्म उवाच जग
त्प्रभुंदेवदेवमनंतंपुरुषोत्तमं । स्तुवन्नामसहस्रेणपुरुषः सततोत्थि
तः ६ तमेवचार्चयन्नित्यंभक्त्यापुरुषमव्ययम् ॥ ध्यायंस्तुवन्नमस्यं
चयजमानस्तमेवच ७ अनादिनिधनंविष्णुंसर्वलोकमहे
श्वरम् लोकाध्यक्षंस्तुवन्नित्यंसर्वदुःखातिगोभवेत् ८ ब्रह्म

ण्यंसर्वधर्मज्ञंलोकानांकीर्तिवर्द्धनं । लोकनाथंमहद्भूतंसर्वभू
तभवोद्भवम् ॥ ९ ॥ एषमेसर्वधर्माणांधर्मोऽधिकतमोमतः य
द्भक्त्यापुंडरीकाक्षंस्तवैरर्चेन्नरः सदा ॥ १० ॥ परमंयोमहत्तेजः पर
मंयोमहत्तपः । परमंयोमहद्ब्रह्म परमंयः परायणम् ११ पवित्रा
णांपवित्रंयोमंगलानांचमंगलं । दैवतं देवतानांचभूतानांयो
ऽव्ययः पिता १२ यतः सर्वाणिभूतानिभवंत्यादियुगागमे यस्मि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२ ञ्चप्रलयंयान्तिपुनरेवयुगक्षये ॥१३॥ तस्यलोकप्रधानस्यजगन्ना
थस्यभूपते ॥ विष्णोर्नामसहस्रंमेश्रृणुपापभयापहम् ॥१४॥ यानि
नामानिगौणानिविख्यातानिमहात्मनः ॥ ऋषिभिःपरिगीता
नितानिवक्ष्यामिभूतये ॥१५॥ ऋषिर्नाम्नांसहस्रस्यवेदव्यासो
महामुनिः छन्दोनुष्टुप्तथादेवोभगवानदेवकीसुतः १६ वि
ष्णुंजिष्णुंमहाविष्णुंप्रभविष्णुंमहेश्वरं अनेकरूपदैत्यांतंन

मामिपुरुषोत्तमम् ॥१७॥ अस्यश्रीविष्णोर्दिव्यसहस्रनामस्तो
त्रमहामंत्रस्यभगवान्वेदव्यासऋषिः अनुष्टुप्छंदः श्रीकृ
ष्णः परमात्माश्रीमन्नारायणो देवता ॥ अमृतांशूद्भवोभानुरिति
वीजं देवकीनंदनः स्रष्टेतिशक्तिः ॥ शंखभृन्नंदकीचक्रीति
कीलकं ॥ श्रीकृष्णप्रीत्यर्थेसहस्रनामजपेविनियोगः
॥ ॐउद्भवायअंगुष्ठाभ्यांनमः ॥ ॐक्षोभणायत

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

12

३ र्जनीभ्यांनमः॥ ओंदेवायमध्यमाभ्यांनमः॥ ओंउद्भवायअनामि
काभ्यांनमः॥ ओंतोभराणायकनिष्ठिकाभ्यांनमः॥ ओंदेवायक
रतलकरपृष्ठाभ्यांनमः॥ इतिकरन्यासः॥ अथहृदयादिन्
न्यासः॥ सुव्रतः सुमुखः सूक्ष्मः ज्ञानायहृदयायनमः स
हस्त्रमूर्द्धाविश्वात्मा ऐश्वर्यायशिरसेस्वाहा॥ सहस्त्रार्चिः
सप्तजिह्वः शक्त्यैशिखायैवषट्॥ त्रिसामासामगः साम व

13

त्स्यकवचायहुं॥ रथाङ्गपाणिरक्षोभ्यः॥ तेजसेनेत्राभ्यांवौषट्॥
शार्ङ्गधन्वागदाधरः॥ वीर्यायअस्त्रायफट्॥ क्रतुः सुदर्शनः
कालः भूर्भुवः स्वरोमिति दिग्बन्धः॥ इति हृदयादिन्यासः॥
अथध्यानम्॥ ओंक्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्से
कतेर्मौक्तिकानां॥ मालाकॢप्तासनस्थः स्फटिकमणिनिभै
र्मौक्तिकैर्मण्डिताङ्गः॥ शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

४ वृषवर्षैरनन्दीनः॥ पुनीयादरीनलिगनदापाङ्कपाणिर्मुकु
न्दः॥१॥ अथवा॥ भूः पादौ यस्य नाभिर्वियदसुरनिलश्च
न्द्रसूर्यौ च नेत्रे कर्णावाशाः शिरो द्यौर्मुखमपि दहनो य
स्य वास्तेयमब्धिः॥ अन्तःस्थं यस्य विश्वं सुरनरखगगो
भोगिगन्धर्वदैत्यैश्चित्रं॥ रंरम्यते तं त्रिभुवनवपुषं विष्णुमी
शं नमामि॥२॥ अथवा॥ शान्ताकारं भुजगशयनं पद्म

नाभं सुरेशं॥ विश्वाधारं गगनसदृशं॥ मेघवर्णं शुभाङ्गं॥ लक्ष्मीकान्तं कमलन
यनं॥ योगिभिर्ध्यानगम्यं॥ वंदे विष्णुं भवभयहरं॥ सर्वलोकैकनाथं॥३॥ ॐ
विश्वं विष्णुर्वषट्कारो॥ भूतभव्यभवत्प्रभुः॥ भूतकृद्भूतभृद्भावो॥ भूतात्मा भू
तभावनः॥ पूतात्मा परमात्मा च॥ मुक्तानां परमा गतिः॥ अव्ययः पुरुषः सा
क्षी॥ क्षेत्रज्ञोक्षर एव च॥४॥ सर्वः सर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः
संभवो भावनो भर्ता॥ प्रभवः प्रभुरीश्वरः॥५॥ स्वयंभूः शंभुरादित्य॥ पुष्क
राक्षो महास्वनः॥ अनादिनिधनो धाता॥ विधाता धातुरुत्तमः॥६॥ अ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

५ प्रमेयो हृषीकेशः॥ पद्मनाभोमरप्रभुः॥ विश्वकर्मा मनुस्त्वष्टा॥ स्थ
विष्ठः स्थविरो ध्रुवः॥ ७॥ अग्राह्यः शाश्वतः कृष्णो॥ लोहिताक्ष
प्रतर्द्दनः॥ प्रभूतस्त्रिककुधाम॥ पवित्रं मंगलं परं॥ ८॥ ईशानः प्रा
णदः प्राणो॥ ज्येष्ठः श्रेष्ठ प्रजापतिः॥ हिरण्यगर्भो भूगर्भो॥ माध
वो मधुसूदनः॥ ९॥ ईश्वरो विक्रमी धन्वी॥ मेधावी विक्रमः क्र
मः॥ अनुत्तमो दुराधर्षः॥ कृतज्ञः कृतिरात्मवान्॥ १०॥ सुरेशः

शरणं शर्मः॥ विश्वरेताः प्रजाभवः॥ अहः संवत्सरो व्यालः॥ प्र
त्ययः सर्वदर्शनः॥ ११॥ अजः सर्वेश्वरः सिद्धः॥ सिद्धः सर्वादि
रच्युतः॥ वृषाकपिरमेयात्मा॥ सर्वयोगविनिःसृतः॥ १२॥ वसु
र्वसुमनाः सत्यः॥ समात्मा सम्मितः समः॥ अमोघः पुंडरीका
क्षो॥ वृषकर्मा वृषाकृति॥ १३॥ रुद्रो बहुशिरा बभ्रू॥ विश्वयोनिः
शुचिःश्रवाः अमृतः शाश्वतस्थाणु वरारोहो महातपः॥ १४॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

18

19

रुद्रोबहुशिरावभ्रुर्विश्वयोनिःशुचिश्रवाः अमृतः शाश्वतः
स्थाणुर्वरारोहोमहातपाः॥१३ सर्वगः सर्वविद्भानुर्विष्वक्से
नोजनार्दनः वेदोवेदविदव्यंगोवेदांगोवेदवित्कविः॥१४
लोकाध्यक्षः सुराध्यक्षोधर्माध्यक्षः कृताकृतः।चतुरात्मा
चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः॥१५ भ्राजिष्णुर्भोजनंभोक्तास
हिष्णुर्जगदादिजः अनघोविजयोजेताविश्वयोनिःपुनर्वसुः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

७

१६ उपेंद्रो वामनः प्रांशुरमोघः शुचिरूर्जितः अतींद्रः संग
हः सर्गो धृतात्मा नियमो यमः १७ वेद्यो वैद्यः सदायोगी वीर
हा माधवो मधुः अतींद्रियो महामायो महोत्साहो महाबलः
१८ महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः अनिर्देश्यवपुः
श्रीमानमेयात्मा महाद्रिधृक १९ महेष्वासो महीभर्ता श्रीनि
वासः सतांगतिः अनिरुद्धः सुरानंदो गोविंदो गोविदांपतिः २०

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः हिरण्यनाभः सुतपाः
पद्मनाभः प्रजापतिः २१ अमृत्युः सर्वदृक सिंहः संधाता संधि
मान्स्थिरः अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा २२
गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः निमिषोऽनिमिषः स्र
ग्वी वाचस्पतिरुदारधीः २३ अग्रणीर्ग्रामणीः श्रीमान्न्यायो
नेता समीरणः सहस्रमूर्द्धा विश्वात्मा सहस्राक्षः सहस्रपात् २४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

७ आवर्त्तनोनिवृत्तात्मासंवृतःसंप्रमर्दनः। अहःसंवर्त्तकोवह्नि
रनिलोधरणीधरः।२५। सुप्रसादःप्रसन्नात्माविश्वधृग्विश्व
भुग्विभुः। सत्कर्तासत्कृतःसाधुर्जह्नुर्नारायणोनरः २६ असं
ख्येयोऽप्रमेयात्माविशिष्टःशिष्टकृच्छुचिः। सिद्धार्थःसिद्धसं
कल्पःसिद्धिदःसिद्धिसाधनः।२७।वृषाहीवृषभोविष्णुर्वृषप
र्वावृषोदरः वर्द्धनोवर्द्धमानश्चविविक्तःश्रुतिसागरः २८ सुभु

जोदुर्धरोवाग्मीमहेंद्रोवसुदोवसुः। नैकरूपोवृहद्रूपःशि
पिविष्टःप्रकाशनः।२९।ओजस्तेजोद्युतिधरःप्रकाशात्माप्रताप
नः ऋद्धःस्पष्टाक्षरोमंत्रश्चंद्रांशुर्भास्करद्युतिः।३०। अमृतां
शूद्भवोभानुःशशविंदुःसुरेश्वरः। औषधंजगतःसेतुःसत्य
धर्मपराक्रमः।३१। भूतभव्यभवन्नाथःपवनःपावनोनलः
कःमहाकामकृत्कांतःकामःकामप्रदःप्रभुः ३२ युगादि

CC-0. Gurukul Kangri University Haridwar Collection, Digitized by S3 Foundation USA

९

ऋद्युगावर्त्तोऽनेकमायो महाशनः ॥ अदृश्योऽव्यक्तरूपश्च स
हस्रजिदनन्तजित् ॥ ३३ ॥ इष्टोविशिष्टः शिष्टेष्टः शिखंडीन
हुषोवृषः । क्रोधहाक्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ अ
च्युतः प्रथितः प्राणः प्राणदोवासवानुजः । अपांनिधिर
धिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ३५ ॥ स्कंदः स्कंदधरो धुर्योवर
दोवायुवाहनः वासुदेवोबृहद्भानुरादिदेवः पुरंदरः ॥ ३६ ॥ अ

25

शोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ॥ अनुकूलः शतावर्त्तः पद्मी
पद्मनिभेक्षणः ॥ ३७ ॥ पद्मनाभोऽरविंदाक्षः पद्मगर्भः शरीरभृ
त् ॥ महर्द्धिरृद्धोवृद्धात्मा महाक्षोगरुडध्वजः ॥ ३८ ॥ अतुलः
शरभोभीमः समयज्ञोहविर्हरिः ॥ सर्वलक्षणलक्षण्योलक्ष्मी
वान्समितिंजयः ॥ ३९ ॥ विक्षरोरोहितोमार्गोहेतुर्दामोदरस्स
हः महीधरोमहाभागोवेगवानमिताशनः ॥ ४० ॥ उद्भवः क्षो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१० भरणोदेवः श्रीगर्भः परमेश्वरः । करणंकारणंकर्त्ताविकर्त्तागह
नोगुहः ४१ व्यवसायोव्यवस्थानः संस्थानः स्थानदोध्रुवः
परर्द्धिः परमःस्पष्टस्तुष्टः पुष्टः शुभेक्षणः । ४२ रामोविरामोविर
जोमार्गोनेयोनयोऽनयः । वीरः शक्तिमतांश्रेष्ठोधर्मोधर्मवि
दुत्तमः ४३ । वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः हि
रण्यगर्भः शत्रुघ्नोव्याप्तोवायुरधोक्षजः ४४ । ऋतुः सुदर्शनः

कालः परमेष्ठीपरिग्रहः । उग्रस्संवत्सरोदक्षोविश्रामोवि
श्वदक्षिणः । ४५ । विस्तारः स्थावरः स्थाणुः प्रमाणंबीजम
व्ययं । अर्थोऽनर्थोमहाकोशोमहाभोगोमहाधनः । ४६ अ
निर्विण्णः स्थविष्ठोभूर्धर्मयूपोमहामखः । नक्षत्रनेमि
र्नक्षत्रीक्षमः क्षामः समीहनः । ४७ । यज्ञइज्योमहेज्यश्च
क्रतुस्सत्रंसतांगतिः सर्वदर्शीविमुक्तात्मासर्वज्ञोज्ञानमुत्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२१ मम् ॥४८॥ सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत्
मनोहरोजितक्रोधोवीरबाहुर्विदारणः ॥४९॥ स्वापनः स्वव
शोव्यापीनैकात्मानेककर्मकृत् ॥ वत्सरो वत्सलो वत्सी रत्नग
र्भोधनेश्वरः ॥५०॥ धर्मगुब्धर्मकृद्धर्मीसदसत्क्षरमक्षरम्
अविज्ञातासहस्रांशुर्विधाताकृतलक्षणः ॥५१॥ गभस्तिने
मिः सत्वस्थः सिंहोभूतमहेश्वरः आदिदेवोमहादेवोदेवेशो

देवभृद्गुरुः ॥५२॥ उत्तरोगोपतिर्गोप्ताज्ञानगम्यः पुरातनः शरीरभू
तभृद्भोक्ताकपींद्रोभूरिदक्षिणः ॥५३॥ सोमपोऽमृतपस्सोमः पुरु
जित्पुरुसत्तमः विनयोजयस्सत्यसंधोदाशार्हस्सात्वतांपतिः
जीवोविनयितासाक्षीमुकुंदोऽमितविक्रमः अंभोनिधिरनं
तात्मामहोदधिशयोंतकः ॥५४॥ अजोमहार्हः स्वाभाव्योजि
तामित्रः प्रमोदनः आनंदोनंदनोनंदः सत्यधर्मात्रिविक्रमः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२२ ५६ महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ॥ त्रिपदस्त्रिदशा
ध्यक्षो महाशृंगः कृतांतकृत् ॥५७॥ महावराहो गोविंदः सुषेणः क
नकांगदी ॥ गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥५८ वेधाः
स्वांगोजितः कृष्णो ॥ दृढः संकर्षणोच्युतः ॥ वरुणो वारुणो वृक्षः
पुष्कराक्षो महामनाः ॥५९॥ भगवान् भगहानंदी वनमाली हलायु
धः आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥६०॥ सुधन्वा

खंडपरशुर्दारुणो द्रविणप्रदः ॥ दिवस्पृक्सर्वदृग्व्यासो वाच
स्पतिरयोनिजः ॥६१॥ त्रिसामा सामगः साम निर्वाणं भेषजं भि
षक् सन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणः ॥६२॥ शु
भांगः शांतिदः स्रष्टा कुमुदः कुवलेशयः ॥ गोहितो गोपतिर्गो
प्ता वृषभाक्षो वृषप्रियः ॥६३॥ अनिवर्ती निवृत्तात्मा संक्षेप्ता
क्षेमकृच्छिवः ॥ श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

३३

१३ ६४ श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः श्री
धरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः ६५ स्वक्षः स्वंगः श
तानंदो नंदिर्ज्योतिर्गणेश्वरः विजितात्मा विधेयात्मा सत्की
र्तिश्छिन्नसंशयः ६६ उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः
स्थिरः भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ६७ अर्चि
ष्मानर्चितः कुंभो विशुद्धात्मा विशोधनः अनिरुद्धोऽप्रतिरथः

३३

प्रद्युम्नोऽमितविक्रमः ६८ कालनेमिनिहा वीरः शौरिः शूरजने
श्वरः त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ६९ का
मदेवः कामपालः कामी कांतः कृतागमः अनिर्देश्यवपुर्विष्णु
र्वीरोऽनंतो धनंजयः ७० ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मवि
वर्द्धनः ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ७१ मह
क्रमो महाकर्मा महातेजा महोरगः महाक्रतुर्महायज्वा महा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

34

२४ यज्ञो महाहविः ॥७२॥ स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता र
णप्रियः पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥७३ मनो
जवस्तीर्थकरो वसुरेता वसुप्रदः। वसुप्रदो वासुदेवो वसुर्वसुम
नाहविः ॥७४॥ सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः शू
रसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥७५॥ भूतावासो वासु
देवः सर्वासुनिलयोऽनलः। दर्पहा दर्पदो दृप्तो दुर्धरोऽथाप

35

राजितः ॥७६॥ विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान्। अने
कमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥७७॥ एकोनैकः सवः कः
किं यत्तत्पदमनुत्तमम्। लोकबंधुर्लोकनाथो माधवो भक्तव
त्सलः ७८ सुवर्णवर्णो हेमांगो वरांगश्चंदनांगदी। वीरहा विष
मः शून्यो घृताशीरचलश्चलः ॥७९॥ अमानी मानदो मान्यो
लोकस्वामी त्रिलोकधृक्। सुमेधा मेधजो धन्यः सत्यमेधा ध

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१५ धराधरः ॥ ८० ॥ तेजोवृषो द्युतिधरः सर्वशस्त्रभृतांवरः ॥ प्रग्रहो
निग्रहो व्यग्रो नैकशृंगो गदाग्रजः ॥ ८१ ॥ चतुर्मूर्तिश्चतुर्बाहुश्च
तुर्व्यूहश्चतुर्गतिः ॥ चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥ ८२
समावर्त्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः ॥ दुर्लभो दुर्गमो दुर्गो
दुरावासो दुरारिहा ॥ ८३ ॥ शुभांगो लोकसारंगः सुतंतुस्तंतुवर्द्धनः
इंद्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ८४ ॥ उद्भवः सुंदरः

सुंदो रत्ननाभः सुलोचनः ॥ अर्को वाजसनः शृंगी जयंतः स
र्वविज्जयी ॥ ८५ ॥ सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरेश्वरः ॥ म
हाह्रदो महागर्तो महाभूतो महानिधिः ॥ ८६ ॥ कुमुदः कुंदरः
कुंदः पर्जन्यः पावनोनिलः ॥ अमृतांशोऽमृतवपुः सर्वज्ञः
सर्वतोमुखः ॥ ८७ ॥ सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुता
पनः ॥ न्यग्रोधोदुंबरोश्वत्थश्चाणूरांध्रनिषूदनः ॥ ८८ ॥ सह

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सप्तार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ॥ अमूर्तिरनघोऽचिं
त्यो भयकृद्भयनाशनः ॥ ८९ ॥ अणुर्बृहत्कृशः स्थूलो गुणभृ
न्निर्गुणो महान् ॥ अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशव
र्द्धनः ॥ ९० ॥ भारभृत्कथितो योगी योगीशः सर्वकामदः ॥ आश्र
मः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥ ९१ ॥ धनुर्धरो धनु
र्वेदो दंडो दमयिता दमः ॥ अपराजितः सर्वसहो नियंतानि

यमो यमः ॥ ९२ ॥ सत्ववान्सात्विकः सत्यः सत्यधर्मपरायणः ॥
अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः ॥ ९३ ॥ विहायस
गतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ॥ रविर्विरोचनः सूर्यः सवि
ता रविलोचनः ॥ ९४ ॥ अनंतो हुतभुग्भोक्ता सुखदो नैकजो
ऽग्रजः ॥ अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥ ९५ ॥
सनात्सनातनतमः कपिलः कपिरव्ययः स्वस्तिदः स्वस्ति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२ कृत्स्वस्तिस्वस्तिभुक्स्वस्तिदक्षिणः ॥ ९६ ॥ अरौद्रः कुंडलीचक्रीविक्र
म्यूर्जितशासनः ॥ शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ९७ अक्रूरः
पेशलो दक्षो दक्षिणः क्षमिणांवरः ॥ विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः
९८ उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ॥ वीरहा रक्षणः सन्तोजी
वनः पर्यवस्थितः ॥ ९९ ॥ अनंतरूपो नंतश्रीर्जितमन्युर्भयापहः ॥
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥ १०० ॥ अनादिर्भूर्भुवो

लक्ष्मीः सुवीरो रुचिरांगदः ॥ जननो जनजन्मादिर्भीमो भीमपराक्रमः
१ आधारनिलयो धाता पुष्पहासः प्रजागरः ॥ ऊर्ध्वगः सत्पथाचा
रः प्राणदः प्रणवः पणः ॥ २ ॥ प्रमाणं प्राणनिलयः प्राणभृत्प्राण
जीवनः तत्वं तत्वविदेकात्मा जन्ममृत्युजरातिगः ॥ ३ भूर्भुवः
स्वस्तरुस्तारः सविता प्रपितामहः ॥ यज्ञो यज्ञपतिर्यज्वा यज्ञांगो य
ज्ञवाहनः ४ यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः यज्ञांत

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१८ ऋग्यजुस्सामगुह्यमन्त्रमन्त्राद्एवच ॥५॥ आत्मयोनिः स्वनंजातो वैखा
नः सामगायनः देवकीनंदनः स्त्रष्टाक्षितीशः पापनाशनः ६
शंखभृन्नंदकीचक्रीशार्ङ्गधन्वागदाधरः रथांङ्गपाणिरक्षोभ्यः
सर्वप्रहरणायुधः ॥१०७॥ सर्वप्रहरणायुध ओं नमः ॥ इति इतीदं
कीर्तनीयस्यकेशवस्यमहात्मनः ॥ नाम्नासहस्रंदिव्यानामशे
षेणप्रकीर्तितं ॥ ८ यइदंशृणुयान्नित्यंयश्चापि परिकीर्तयेत् ना

शुभं प्राप्नुयात्किंचित्सोऽमुत्रेह चमानवः ॥९॥ वेदान्तगो ब्राह्मणः स्यात्क्ष
त्रियो विजयी भवेत् ॥ वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् १०
धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ॥ कामानवाप्नुयात्कामी प्र
जार्थी प्राप्नुयात्प्रजाम् ॥११॥ भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमान
सः ॥ सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥१२॥ यशः प्राप्नोति वि
पुलं ज्ञातिप्राधान्यमेवच ॥ अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

५५

॥२९॥ १३ ॥ नभयं क्वचिदाप्नोति वीर्यंतेजश्च विन्दति ॥ भवत्यरोगो
द्युतिमान्बलरूपगुणान्वितः ॥ १४ ॥ रोगार्तो मुच्यते रोगाद्बद्धो मु
च्येत बन्धनात् ॥ भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः
॥ १५ ॥ दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ॥ स्तुवन्नामस
हस्रेण नित्यंभक्तिसमन्वितः ॥ १६ वासुदेवाश्रयो मर्त्यो वासु

५६

देवपरायणः ॥ सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥ १७
नवासुदेवभक्तानामशुभंविद्यतेक्वचित् ॥ जन्ममृत्युजरा
व्याधिभयंनैवोपजायते ॥ १८ ॥ इमंस्तवमधीयानः श्रद्धाभ
क्तिसमन्वितः ॥ युज्येतात्मसुखक्षांतिश्रीधृतिस्मृतिकीर्ति
भिः ॥ १९ नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः भवन्ति
कृतपुण्यानांभक्तानांपुरुषोत्तमे ॥ १२० ॥ द्यौसचन्द्रार्कनक्ष

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२० त्रार्कं दिशो भूर्महोदधिः वासुदेवस्य वीर्येण विधृतानि महा
त्मनः २१ ससुरासुरगंधर्वं सयक्षोरगराक्षसम् जगद्वशे ऽवर्त्त
तेदं कृष्णस्य सचराचरम् २२ इंद्रियाणि मनो बुद्धिः सत्वं ते
जो बलं धृतिः वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च २३
सर्वागमानामाचारः प्रथमं परिकल्पते आचारप्रभवो धर्मो
धर्मस्य प्रभुरच्युतः २४ ऋषयः पितरो देवा महाभूतानि धा

तवः जंगमाजंगमं चेदं जगन्नारायणोद्भवम् २५ योगो ज्ञा
नं तथा सांख्यं विद्याः शिल्पादि कर्म च वेदाः शास्त्राणि विज्ञा
नमेतत्सर्वं जनार्दनम् २६ एको विष्णुर्महद्भूतं पृथग्भूता
न्यनेकशः त्रींल्लोकान्व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः
२७ इदं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् पठेद्य इच्छे
त्पुरुषः श्रेयः प्राप्तुं सुखानि च २८ विश्वेश्वरमजं देवं जग

तः प्रभवाप्ययम् ॥ भजंति ये पुष्कराक्षं न ते यांति पराभवम् २९
र्जुन उवाच ॥ पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम ॥ भक्तानामनु
रक्तानां त्राता भव जनार्दन ॥ १३० ॥ श्रीभगवानुवाच ॥ यो मां नाम
सहस्रेण स्तोतुमिच्छति पांडव ॥ सोहमेकेन श्लोकेन स्तुत एव
न संशयः ३१ नमोऽस्त्वनंताय सहस्रमूर्तये सहस्रपादाक्षिशि
रोरुबाहवे सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधा

रिणे नमः ३२ नमः कमलनाभाय नमस्ते जलशायिने नम
स्ते केशवानंत वासुदेव नमोस्तु ते ३३ वासनाद्वासुदेवस्य वा
सितं भुवनत्रयम् सर्वभूतनिवासोसि वासुदेव नमोस्तु ते ३४
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च जगद्धिताय कृष्णा
य गोविंदाय नमो नमः ३५ आकाशात्पतितं तोयं यथा गच्छ
ति सागरम् सर्वदेवनमस्कारः केशवं प्रति गच्छति ३६ एष

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२२ निष्कंटकः पंथा यत्र संपूज्यते हरिः॥ कुपथं तं विजानीयाद्गोविं
दरहितागमम्॥ ३७॥ सर्ववेदेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं
तत्फलं समवाप्नोति स्तुत्वा देवं जनार्दनम्॥ ३८॥ यो नरः पठते
नित्यं त्रिकालं केशवालये द्विकालमेककालं वा क्रूरं सर्वं व्य
पोहति ३९ दह्यंते रिपवस्तस्य सौम्याः सर्वे सदा ग्रहाः विली
यंते च पापानि स्तवे ह्यस्मिन्प्रकीर्तिते १४० येन ध्यातः श्रु

तो येन येनायं पठितः स्तवः दत्तानि सर्वदानानि सुराः सर्वे स
मर्चिताः ४१ इहलोके परे वापि न भयं विद्यते क्वचित् नाम्नां
सहस्रं योऽधीते द्वादश्यां मम सन्निधौ ४२ स निर्दहति पापा
नि कल्पकोटिशतानि च अश्वत्थसन्निधौ पार्थ कृत्वा मन
सि केशवम् ४३ पठेन्नामसहस्रं तु गवां कोटिफलं लभेत
शिवालये पठेन्नित्यं तुलसीवनसंस्थितः ४४ नरो मुक्तिम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२३ वाप्नोति चक्रपाणेर्वचो यथा। ब्रह्महत्यादिकं पापं सर्वं सद्यो वि
नश्यति ॥१४५॥ इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैया
सिक्यामानुशासनिके पर्वणि दानधर्मे भीष्मयुधिष्ठिरसंवा
दे श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रं समाप्तम् सम्वत [illegible] वैशा
ख [illegible] ८ भृगुवासरे लिखितं ज्वालाप्रसादशर्मणा [illegible] शुभमस्तु

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२३ वाप्नोतिचक्रपाणेर्वचोयथा॥ब्रह्म
नश्यति ॥१४५॥इतिश्रीमहाभारते
[illegible]मानुशासनिके पर्वणि दा
[illegible]विष्णोर्दिव्यसहस्रनामस्तो
[illegible]णा ८ भगुवासरे लिखितं [illegible]

54

55

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

57

इतिश्रीविष्णुसहस्रनामसमाप्तं॥

56

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

60

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA